# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभागः)

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

प्रथमं प्रश्नपत्रम् – First Paper

(समयः १०.३० से १.००) (पूर्णांकाः ५०)

प्र.१. हिन्दीभाषया/मातृभाषया/आंग्लभाषया/माध्यमभाषया वा त्रयः श्लोकाः व्याख्येयाः । ९

स निर्जित्य पुरीं श्रेष्ठां लंकां तां कामरूपिणीम् ।
निशि लंकां महासत्त्वो विवेश कपिकुञ्जरः ।।१।।

राजमार्गं समावृत्य स्थितं रक्षोबलं महत् ।
ददर्श मध्यमे गुल्मे राक्षसस्य चरान् बहून् ।।२।।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ।।३।।

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ।।४।।

प्र.२. संस्कृतभाषया षण्णामेव उत्तरं देयम् । ६

(१) काकः स्वभावेन कीदृशः आसीत्? (२) कः सीताम् अहरत्? (३) कैकेय्याः दुष्टा दासी का आसीत्? (४) कः पूजाम् अर्हति । (५) पर्वतात् के क्षरन्ति? (६) वृक्षेषु के कूजन्ति?

प्र.३. अधस्तनस्य गद्यखण्डस्य स्वोत्तरभाषया अनुवादं कुरुत । १०

राजपुरुषाः अकथयन्ः-हंस! त्वं सत्यं वदसि तथापि काकः तव मित्रं स च चौरः । त्वं तस्य सहचरः असि, अतः मित्रस्य दण्डं सहस्व इत्युक्त्वा ते हंसे बाणान् अक्षिपन् । अनेन प्रकारेण सः वराकः हंसः पंचत्वं अगच्छत् । अतः उच्यते-

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत् सीतां बन्धनं च महोदधेः ।

प्र.४. (क) त्रयाणां विग्रहवाक्यानि लिखत । ३

नरपतिः, राजकुमाराः, वृषस्कन्धः, वसुधाधिपः ।

(ख) त्रयाणां सन्धिविच्छेदं कुरुत । ३

भूत्यर्थं, सदृशारम्भः कथयोपायम्, किमपि ।

(ग) त्रयाणां लिंगवचनविभक्तीः प्रदर्शयत । ३

फलानि, बाणान्, नार्यः, रमा ।

(घ) ''भू''-धातोः लटि (वर्तमानकाले) रूपाणि लिखत । ३

(ङ) केषाञ्चित् त्रयाणां धातूनां लकारपुरुषवचनानि लिखत । ३

जानासि, सहिष्यते, अभवन्, स्मारयामास ।

प्र.५. स्वोत्तरभाषया अनुवादः कार्यः । ५

(१) यः गर्जति स न वर्षति । (२) पक्षिणः वृक्षेषु कूजन्ति । (३) सः परमात्मानं चिन्तयति । (५) सः गायकः श्लोकम् एकं गायति । (५) अहं तु राष्ट्राय जीवनमपि दास्यामि ।

प्र.६. अधस्तनानां वाक्यानां संस्कृतभाषया अनुवादः कार्यः । ५

(१) धनिक निर्धनों को धन देता है । (२) मैंने तप नहीं किया । (३) वह अपनी प्रशंसा करता है । (४) इस नगर में कोई भीख नहीं मांगता । (५) राम संस्कृत पढ़ता है ।

(1) Rich person gives money to the poor. (2) I did not perform penance. (3) He praises himself. (4) Nobody begs in this city. (5) Ram learns Sanskrit.

* * *

# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभाग:)

## संस्कृत-कोविद:

## SAMSKRITA KOVIDA

द्वितीयं प्रश्नपत्रम् – **Second Paper**

(समय: २.०० त: ४.३०) (पूर्णांका: ५०)

प्र.१. हिन्द्या/आंग्लभाषया/माध्यमभाषया वा केषाश्चित् त्रयाणां श्लोकानां भावार्थो लेख्य: । ९

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम् ।
रमते न मरालस्य मानसं मानसं विना ।।१।।

स हत्वा वालिनं वीरस्तत्पदे चिरकांक्षिते ।
धातो: स्थान इवादेशं सुग्रीवं सन्न्यवेशयत् ।।२।।

तमुवाच महातेजा: सर्वलोकपितामहम् ।
भगीरथो महाबाहु: कृतांजलिपुर:स्थित: ।।३।।

तत: सीतामुपागम्य राक्षस्यो भीमदर्शना: ।
पुन: परुषमेकार्थमनर्थार्थमथाऽब्रुवन् ।।४।।

प्र.२. संस्कृतभाषया षण्णां प्रश्नानाम् उत्तरं लिखत । ६

(१) घना: कुत्र गर्जन्ति ?
(२) न्यायाधीश: किं करोति ?
(३) निष्कारणं सज्जनं क: गर्हयति ?
(४) भक्त: कं चिन्तयते ?
(५) सुग्रीव: कस्य भ्राता आसीत् ?
(६) भगीरथ: कस्मिन् कुले बभूव ?
(७) त्रिजटा स्वप्ने किं ददर्श ?

प्र.३. अधस्तनस्य गद्यखण्डस्य स्वोत्तरभाषयाऽनुवादं कुरुत । १०

अनुसूया-सखि ! ममाप्यस्ति कौतूहलम् । पृच्छामि-तावदेनम् (प्रकाशम्) आर्यस्य मधुरालापजनितो विस्रम्भो मां मन्त्रयते कतम आर्येण राजर्षिवंशोऽलंक्रियते, कतमो वा विरहपर्युत्सुकजनः कृतो देशः किं निमित्तं वा सुकुमारतरोऽपि तपोवनगमनपरिश्रमस्यात्मा पदमुपनीतः ।

प्र.४. (क) नामनिर्देशपूर्वकं त्रयाणां समासानां विग्रहं कुरुत । ३

शरीरसंवर्धनम्, जातशंकैः, वसुधातलात्, अधोमुखी ।

(ख) नामनिर्देशपूर्वकं त्रयाणां सन्धिविच्छेदं कुरुत । ३

प्रभुरीश्वरः, मन्त्रिष्वाधाय, राजर्षिः, मनोरथाः ।

(ग) त्रीन् शब्दान् स्ववाक्येषु योजयत । ३

नीरजम्, मानसम्, उलूकः, दुनोति ।

(घ) 'चल्'-धातोः लृट्-लकारे (भविष्यत्काले) सर्वाणि रूपाणि लिखत । ६

प्र.५. अधस्तनानां पञ्चानां वाक्यानां संस्कृतभाषायामनुवादं कुरुत । १०

(१) किसान पशुओं को पालते हैं ।
Farmers rear cattle.

(२) मैं चोरी नहीं करुँगा ।
I will not thieve.

(३) कौन उसे शान्त करेगा ?
Who will pacify him ?

(४) नारी आभूषण धारण करती है ।
The woman wears ornaments.

(५) धनवान् सज्जनों की पूजा करता है ।
The rich man worships good people.

(६) सज्जन सन्मार्ग खोजते हैं ।
The good people seek the path of honesty.

* * *

# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभागः)

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

तृतीयं प्रश्नपत्रम् – Third Paper

(समयः १०.३० तः १.००) (पूर्णांकाः ५०)

प्र.१. त्रीन् श्लोकान् व्याख्याय हिन्दीभाषया/आंग्लभाषया/माध्यमभाषया वा भावार्थं लिखत । ९

रूपे गीते च माधुर्यं तयोस्तज्ज्ञैर्निवेदितम् ।
ददर्श सानुजो रामः शुश्राव च कुतूहली ।।

वयोवेषविसंवादि रामस्य च तयोस्तदा ।
जनता प्रेक्ष्य सादृश्यं नाक्षिकम्पं व्यतिष्ठत ।।

सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि ।
आश्रमः कतरस्मिन्नो देशे भवति सम्मतः ।।

अयं देशः समः श्रीमान् पुष्पितैस्तरुभिर्वृतः ।
इहाश्रमपदं सौम्य यथावत्कर्तुमर्हसि ।।

प्र.२. ससन्दर्भं त्रयाणां वाक्यानामर्थं विलिख्य स्वोत्तरभाषया व्याख्या कार्या । ६

(१) स्वसिद्धिं नियमैरिव । (२) शिवोऽपि कालाग्नितया विभावितः । (३) काष्ठैरिवाग्निः सहसा प्रदीप्तः । (४) आज्ञा गुरूणां ह्यविचारणीया ।

प्र.३. हिन्दीभाषया/आग्लंभाषया/माध्यमभाषया वा अनुवादः कार्यः । १०

रमेशः दुष्टप्रकृतिरासीत् । स कक्षायां हरेस्तथाभूतं सम्मानं न सेहे । स शुक्रवासरे हरेः गृहं गत्वा तमूचे-अहो प्रियमित्र हरे ! भवान् कक्षायां श्रेष्ठः इति कृत्वाहं भवन्तं स्वकीयं लेखं दर्शयितुं समागतोऽस्मि । पश्यतु कृपया दर्शयतु च दोषान् संशोधयतु च तान् इति ।

प्र.४. (क) त्रयाणां विग्रहवाक्यानि विलिख्य समासनाम लिखत । ३

सुन्दराक्षरम्, यथाशक्ति, मसीपात्रम्, कुशलवौ ।

(ख) त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत । ३

यश्छात्रः, रमेशः, परमानन्दः, अन्वभवत् ।

(ग) त्रीणि पदानि स्ववाक्येषु योजयत । ३

स्वपिति, कारागारे, विलम्बं, उपदिशति ।

(घ) त्रयाणां लकारपुरुषवचनानि निर्दिशत । ३

भवति, अपठत्, अकरोत्, गच्छेत् ।

(ङ) भू-धातोः लोट्-लकारे सर्वाणि रूपाणि लिखत । ३

प्र.५. स्वभाषयाऽनुवादो विधेयः । १०

(१) पुरा गजो राजवाहनं बभूव ।

(२) मातुल, उद्धर माम् ।

(३) सः आदरात् जलाभिषेकं कुरुते ।

(४) परमेश्वरः नः पायात् ।

(५) मन्दभागिनी खल्वहम् ।

* * *

F-2010

# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभागः)

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

चतुर्थं प्रश्नपत्रम् – Fourth Paper

(समयः २.०० तः ४.३०) (पूर्णांकाः ५०)

प्र.१. अधस्तनेषु पद्यानामर्थं हिन्द्या/आंग्लभाषया/माध्यमभाषया वा लिखत । २०

(क) मनसाऽपि न विप्रियं मया कृतपूर्वं तव किं जहासि माम् ।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ।।

(ख) अधिगतं विधिवद्यदपालयत्प्रकृतिमण्डलमात्मकुलोचितम् ।
अभवदस्य ततो गुणवत्तरं सनगरं नगरन्ध्रकरौजसः ।।

(ग) श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः ।
उपवनान्तलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः ।।

(घ) जटिलं चीरवसनं प्राञ्जलिं पतितं भुवि ।
ददर्श रामो दुर्दर्शं युगान्ते भास्करं यथा ।।

(ङ) आघ्राय रामस्तं मूर्ध्नि परिष्वज्य च राघवः ।
अंके भरतमारोप्य पर्यपृच्छत् स सादरम् ।।

(च) अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ।।

**प्र.२. स्वोत्तरभाषयाऽनुवादं कुरुत ।** १०

अतो विश्वे विजयं कामयमानाः सर्वदा सङ्गतिन्न विजहते । अस्माभिरपि सत्सङ्गतेर्महान् लाभोऽयं द्रष्टव्यः स्वजीवने च समुन्नति-प्राप्तये प्रयतितव्यम् । वयमेव प्रमृष्टाः अपि सत्सङ्गत्या जातु संसाधयिष्यामः समुन्नतिपदोत्सेधम् । आहतं रजोऽपि मूर्धानमधिरोहति ।

**प्र.३. द्वावाश्रित्य स्वोत्तरभाषया लघुनिबन्धो लेख्यः ।** १०

शिशुपालवधम्, नैषधचरितम्, कुमारसम्भवम् ।

**प्र.४. अधस्तनेषु द्वयोः टिप्पणी कार्या ।** १०

बाणभट्टः, भारविः, भासः ।

* * *